Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(मासिकी संस्कृतपत्रिका)
वर्ष : २० अङ्क : २४५
सप्टेम्बर - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

सद्गुणानां सङ्ग्रहः

ऋषयः आर्यधर्मस्य स्थापनां कृतवन्तः। ते एव आदौ समाजशास्त्रं रचितवन्तः। सत्यम्, अहिंसा, शौचम्, स्वाध्यायः इत्यादीन् गुणान् प्रति तेषां चिन्तनं लोककल्याणकृत् अपूर्वं च आसीत् । ऋषयः न केवलम् उपदेशान् दत्तवन्तः, तत्पूर्वं स्वजीवने तेषां परीक्षणम् अपि कृतवन्तः । अतः ते विशेषतः पूजार्हाः वर्तन्ते। तेषां जीवनं प्रलोभनरहितम् आसीत्। राजभयम् अपि तेषां जीवने न आसीत्, अतः तैः उपदिष्टं पूर्णतः पावनम् आसीत्। अद्य अपि लोकहिताय प्रवृत्ताः विमलहृदयाः मनुष्याः खलु ऋषयः एव। भारते ऋषिपरम्परा भिन्नस्वरूपेण प्रकाशते अद्यत्वे।

तस्मिन् काले ऋषयः प्रज्ञाबलेन ज्ञातवन्तः यत् समाजस्य उत्कर्षाय वर्णाश्रमव्यवस्था आवश्यकी । तत्र कौशलानां सेचनं कर्तव्यम्। तदनु शिक्षणविदः सज्जनाः गुरुकुलानि निर्मितवन्तः। तत्र शास्त्राणि विकसितानि। प्ररक्षणं प्रति प्रीतिमन्तः शूरपुरुषाः शस्त्राणि धृतवन्तः। सज्जनानां रक्षणं दुर्जनानां निग्रहणं चेति उभयविधं कर्तव्यं तेषां शिरसि आसीत् । आहारादीनां कल्पनार्थम् अपरः वर्गः प्रकाशितः । अनेन वाणिज्यं प्रारब्धम् । सेवाकर्म अपि समाजव्यवस्थायाम् अनिवार्यम्। इतरे तदर्थं प्रवृत्ताः। एवं सकलः समाजः स्वकौशलबलेन विकासं साधितवान्।

ऋषिभिः निरीक्षितं यत् वृत्तितः विभक्तानाम् एतेषां मनुष्याणां किमपि गुणसम्पन्नं शिक्षणम् आवश्यकम्। सद्गुणवञ्चितः समाजः धनवान् भवितुं शक्नोति, परन्तु सः शान्तिम् अनुभवितुं न अर्हति। ऋषीणाम् अभिलाषः आसीत् यत् समाजः नानामार्गैः सद्गुणानां सङ्ग्रहं कुर्यात्। व्यतीते काले लौकिकसाहित्यस्य निर्माणम् अभवत्। अत्रापि कवयः सद्गुणानां वर्णने विशेषतः व्यापृता इति स्पष्टं प्रतीयते।

भर्तृहरिः लिखति– **येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**

ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥

विलक्षणा: घटना:

अमेरिकादेशे नेब्रास्काप्रदेशे बेद्रिस्नामकं नगरम् अस्ति। पञ्चशत: वर्षेभ्य: पूर्वं तत्र कश्चन क्रिस्तालय: आसीत् । सुन्दरे तस्मिन् क्रिस्तालये कश्चन कार्यकर्तृगण: नियततया गानकार्यं करोति स्म । सर्वे सङ्गीतगणीया: सर्वदा समये उपस्थिता: भवन्ति स्म । तेषां सा प्रवृत्ति: आसीत्।

किन्तु १९५०तमे वर्षे मार्चमासस्य प्रथमे दिनाङ्के तस्मिन् क्रिस्तालये काचित् अनूह्या घटना घटिता।

तत्र वाल्टर् क्लेम्पल: धर्मगुरु: । स: सायङ्कालीनस्य कार्यक्रमस्य सन्नाहस्य निमित्तम् अपराह्ने एव क्रिस्तालयं गतवान्। सपादसप्तवादने प्रार्थनाभवनम् उष्णं यथा स्यात् तथा कर्तुम् अग्निनीडे अग्निं प्रज्वाल्य रात्रिभोजनस्य निमित्तं गृहं प्रत्यागतवान् स: ।

दशाधिकसप्तवादने स: पत्न्या पुत्र्या च सह क्रिस्तालयं प्रति प्रस्थित: । प्रस्थानसमये तस्य पत्न्या: मनसि भावना आगता यत् मम वस्त्रं सुधार्यं नास्ति इति। अत: सा तेषां समीकरणाय (Ironing) पुन: प्रकोष्ठं गतवती। अत: तेषां प्रस्थाने विलम्ब: जात: । तस्मात् सा विलक्षणा घटना यदा घटिता तदा ते क्रिस्तालये न आसन्।

हार्वे आल: वृत्त्या यन्त्रकार: । तस्य पत्नी अन्यत्र गता आसीत्। अत: उभयो: पुत्रयो: पोषणं तेनैव करणीयम् आसीत् । तस्मिन् दिने मित्रेण सह सम्भाषणं कुर्वन् न ज्ञातवान् यत् क्रिस्तालयगमनाय विलम्ब: जायमान: अस्ति । इत:पूर्वं कदापि तेन एवं न कृतम् आसीत्। सम्भाषणान्ते तेन घटी दृष्टा। तत्र दृश्यते स्म सपादसप्तवादनं जातम् इति।

मरिलिन् पौला काचित् पियानोवादिका गीताभ्यासाय अर्धघण्टापूर्वमेव गन्तव्यम् इति तस्या: सङ्कल्प: आसीत् । सायङ्कालीनं भोजनं समाप्य सा काकनिद्रायां मग्ना । यदा माता ताम् उत्थापितवती तदा आसीत् सपादसप्तवादनम्। 'मुखादिकं प्रक्षाल्य गमनसमये अद्य विलम्ब: भविष्यति' इति अचिन्तयत् सा।

प्रार्थनागीतगणस्य निर्देशिका एफ्. बौला पियानोवादिकाया: माता। पुत्र्या: उत्थापनात् सज्जीकरणात् च तस्या: अपि विलम्ब: जात: । तच्च शैत्याधिक्ययुतं दिनम् । शीघ्रलिपिकारा जोयीब्लक्वर्या शरीरे आलस्यम् अनुभूतवती सा उष्णवायुयुक्ते स्वगृहे अल्पकालं सुखेन शयितवती । यावत् तया उत्थितं तावता सपादसप्तवादनम् अतीतम् आसीत्। अत: सा विलक्षणा घटना यदा घटिता तदा सा क्रिस्तालये न आसीत्।

लडोना वन्देग्रिफ्ट् विद्यालयस्य बालिका। रेखागणितस्य समस्या काचित् तां बाधते स्म। तस्या: निवारणाय सा एकाग्रचित्ततया उपविष्टवती । यावत् तया समस्याया: समुचित: परिहार: प्राप्त: तावता तु सपादसप्तवादनम् अतीतम् एव आसीत् । अत: या प्रतिदिनम् अविलम्बेन उपस्थिता भवति स्म सा तस्मिन् दिने समये उपस्थातुं न शक्तवती।

सदिया रोयेना च क्रिस्तालयं प्रति गमनाय सज्जीभूय गृहे स्थिते आस्ताम्। तयोः कार्यानं सम्यक् न आसीत् इत्यतः लडोनां ते निवेदितवत्यौ यत् आवां भवत्या सहैव आगच्छावः, भवती अस्मद्गृहमार्गेण गच्छतु इति। किन्तु लडोना रेखागणितसमस्यायाः परिहारप्राप्तौ निमग्ना सती समयातिपातं न ज्ञातवती खलु ! अतः विलक्षणघटनायाः समये ते भगिन्यौ गृहे एव आस्तां लडोनां प्रतीक्षमाणे...।

ल्युसिल्ला जोन्स, डोरोथी वुड् च प्रतिवेशिन्यौ सहाध्यायिन्यौ च। प्रार्थनागीतगानार्थं सदा ते सहैव गच्छतः। यस्मिन् दिने सा विलक्षणा घटना घटिता तस्मिन् दिने ल्युसिल्ला कस्यचित् आकाशवाणीकार्यक्रमस्य श्रवणे निमग्ना, यश्च सप्तवादनतः सार्धसप्तवादनपर्यन्तं प्रचलति स्म। ध्वन्यङ्कनं कृत्वा पुनरपि तत् श्रोतव्यम् आसीत् तया। अतः सा समये न निर्गता। तस्मात् तां प्रतीक्षमाणा डोरोथी अपि गृहे एव स्थितवती। अतः विलक्षणघटनाकाले ताभ्यां क्रिस्तालये न उपस्थितम्। लिर्यानाई चस्टर् तस्याः पुत्री च युक्ते एव समये गृहात् निर्गतवत्यौ आस्ताम्। किन्तु लिर्यानार्डया काञ्चित् गोष्ठीं प्रति गमनाय मातुः साहाय्यं करणीयम् आसीत् इत्यतः सा मातुः गृहं गतवती। ततः निर्गमनसमये अल्पः विलम्बः जातः एव। तस्मात् सा अपि विलक्षणघटनासमये क्रिस्तालये न आसीत्।

हर्बाट् किफ् लेत्यन्त्रचालकः। सः सर्वदा अपि सपादसप्तवादनात् पूर्वम् एव क्रिस्तालये उपस्थितः भवति स्म। किन्तु तस्मिन् दिने कस्यचित् पत्रस्य लेखने निमग्नः सः 'समयः अतिक्रान्तः' इत्येतत् न लक्षितवान् एव। यदा तेन पत्रलेखनं समापितं तावता सपादसप्तवादनम् अतीतम् आसीत्।

तस्मिन् दिने, तन्नाम १९५० तमवर्षस्य मार्चमासस्य प्रथमे दिनाङ्के यस्मिन् समये सङ्गीताभ्यास-गणेन क्रिस्तालये मेलनीयम् आसीत्, ततः दशानां निमेषाणाम् अनन्तरं, तन्नाम पञ्चविंशत्यधिकसप्तवादने (७.२५) कश्चन महास्फोटः जातः तस्मिन् क्रिस्तालये। स्फोटशब्देन तत् बेट्रीसनगरं प्रतिध्वनितं जातम्। स्फोटजनिताः अग्नितारकाः आकाशे स्फुरिताः। स्फोटकारणतः क्रिस्तालयस्य भित्तयः ध्वस्ताः। काष्ठमयी छदिः धराशायिनी जाता।

सौभाग्यवशात् तस्मिन् समये तत्र कोऽपि न आसीत्। यैः सङ्गीताभ्यासगणस्य सदस्यैः प्रतिदिनं समये उपस्थितैः भूयते स्म, तेषु एकैकोऽपि एकैकस्मात् कारणात् तस्मिन् समये न उपस्थितः। अनुपस्थितेः कारणानि तु क्षुल्लकानि आसन्। आकाशवाणीकार्यक्रमस्य श्रवणं, पत्रलेखनं, काकनिद्रा, गणितसमस्या, वस्त्रस्य अस्तव्यस्तता, कार्यानस्य अनागमनम् इत्यादीनि एव कारणानि। एतानि सर्वाणि अपि युगपत् एव उपस्थितानि आसन्। एतत् कथं सम्पन्नम् ? किं कापि शक्तिः एवं कारितवती ? यदि कापि शक्तिः एवं कारितवती न स्यात् तर्हि कथं वा एकैकस्य पुरतः एकैकं कारणं उपस्थितं भवेत् ?

क्रिस्तालये कथं स्फोटः जातः ? वास्तविकं कारणं न ज्ञातम्। तथापि एवं ऊह्यते - इन्धनानिलस्य नलिकायां जातात् भङ्गात् अनिलः निर्गतः स्यात्, अग्निसम्पर्कात् अनिलव्यवस्थायाम् एव अग्रेः प्रसारात् स्फोटः जातः स्यात् इति। सङ्गीताभ्यासगणीयाः तस्याः घटनायाः अनन्तरं प्रवृत्तं समग्रं स्मृतिपटलम् आनीतवन्तः।

'अज्ञाता दिव्या शक्तिः एव एकैकस्य पुरतः एकैकं कारणम् उपस्थापयत्, तस्मात् एव अस्माकं प्राणाः रक्षिताः अभवन्' इति स्वगतं वदन्तः ते देवं मनसा नमस्कृतवन्तः। किं भवन्तः अपि अज्ञातशक्तौ विश्वासवन्तः ?

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते ...)

महाकविकालिदासग्रथितवस्तुनि अभिज्ञानशाकुन्तलाभिधाने नाटके एतावता अस्माभिः दृष्टं यत् पुरा आश्रमस्थितायां शकुन्तलायाम् अनुरक्तः राजा तया सह गान्धर्वेण विवाहेन परिणीतः। ततः दुर्वासोमुनिशापवशेन विस्मृता शकुन्तला अङ्गुलीयकप्राप्त्या पुनरपि स्मृतिपथं नीता। इदानीं राजा विरहदुःखं सहति। इतः स्वर्गे युद्धार्थम् आहूतः राजा। तत्र विजित्य पुनरपि पृथ्वीं समागच्छन् सः हेमकूटपर्वते मुनिपतिदर्शनार्थम् अवतीर्णः। इह कश्चित् बालः सिंहशिशुना सह क्रीडति। तापसीभ्यां भूयोऽपि निवारितः सः न सिंहशिशुं मुञ्चति। एका तापसी अन्यतरत् क्रीडनकम् आनेतुं गता। क्रीडतः तस्य रक्षासूत्रं पतितम्। राज्ञा तद् रक्षासूत्रं हस्तेन गृहीत्वा दत्तम्। इदं दृष्ट्वा तापस्यौ आश्चर्यान्विते। यतः पितरौ आत्मानं च अतिरिच्य न कोऽपि तत् सूत्रं गृह्णीयाद् इति नियमः। अन्यथा सः रक्षागण्डः सर्पीभूय दंशति। राज्ञा वृत्तान्तः ज्ञातः। तदा शकुन्तला प्रविष्टा।

ततः पश्चात्तापेन विवर्णं राजानम् आलोक्य शकुन्तला ''कोऽयं राजपुरुषः'' इति वितर्कयते। राजा कथयति – ''प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलं संवृत्तम्'' इति। शकुन्तलायाः मनसि निर्णयः जातः। ''जअदु जअदु'' इत्यर्धोक्ते बाष्पकण्ठी सा विरमति। राजा उद्गृणाति –

''बाष्पेन प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते दुष्टमसंस्कारपाटलौष्टमिदं मुखम् ॥''

भूमौ स्थितं राजानं शकुन्तला उत्थापयति। अहं भवता कथं स्मृता इति शकुन्तला राजानं पृच्छति। राजा शकुन्तलायाः नेत्रयोः निःसरन्तं बाष्पं परिमार्ष्टि। तदैव शकुन्तलया तस्य हस्ते अङ्गुलीयकं दृष्टम्। अनुक्षणं तया निवेदितं यदेतदेव अङ्गुलीयकम् इति। राज्ञाऽपि प्रत्यजिज्ञपद् यद् अनेनैव अङ्गुलीयकेन तस्य स्मृतिः आगता। इतः मातलिः प्रविश्य राज्ञे निवेदयति यत् भगवान् मारीचः तं द्रष्टुमिच्छति। ते मारीचस्य पार्श्वे गच्छन्ति। मारीचः राजानम् अवलोक्य कथयति –

''पुत्रस्य ते रणशिरस्ययमग्रयायी दुःषन्त इत्यभिहितो भुवनस्य भर्ता।
चापेन यस्य विनिवर्तितकर्म जातं तत्कोटिमत्कुलिशमाभरणं मघोनः ॥''

राजा उभाभ्यामपि प्रणमति। ततः शकुन्तला सहपुत्रा चरणयोः पतति। मारीचः आशीः प्रदत्ते –

''आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते योज्या पौलोमीमङ्गला भव ॥''

मारीचः सर्वमपि वृत्तान्तं विरहस्य च रहस्यं दुष्यन्ताय निवेदयति। बाले एव वंशप्रतिष्ठा मम भाविनीति राजा विज्ञापयति मारीचाय देवाय। सः च –

''रथेनानुद्धातस्तिमितगतिनोत्तीर्णजलधिः पुरा सप्तद्वीपामवति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥''

इमं वृत्तान्तं महर्षये कण्वाय निवेदयितुं गालवाख्यं शिष्यं प्रेषयति मारीचः। अदितिरपि ताम् उपचरन्तीं मेनकां निवेदयति। मारीचः राज्ञे आशीः प्रदत्ते। भरतवाक्यम् –

''प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयताम्।
ममाऽपि च क्षपयतु नीललोहितः पुनर्भवं परिगतभक्तिरात्मभूः ॥''

(समाप्तम्)

मासवार्त्ता:

सम्पन्नः संस्कृतदिनोत्सवकार्यक्रमः ।

श्रावणीपूर्णिमादिनं संस्कृतदिनम् इति भारतसर्वकारेण उद्घोषितं वर्तते । संस्कृतदिनम् उपलक्ष्य शैक्षणिकसंस्थानैः संस्कृतसप्ताहस्यापि आयोजनं क्रियते । अगस्तमासस्य ३० दिनाङ्के एकलव्य-संस्कृत-फाण्डेशनसंस्थाने अपि संस्कृतदिनोत्सवस्य आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् संस्थानस्य बालसंस्कृतवर्गस्य, संस्कृतभाषाशिक्षणवर्गस्य च छात्राः विविधैः कार्यक्रमैः स्वकीयां संस्कृताध्ययनप्रतिभां प्रादर्शयन् ।

आरब्धः "Diploma in Sanskrit Teaching" अभ्यासक्रमः ।

संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय एकलव्य-संस्कृत- फाउण्डेशनसंस्थानं प्रतिवर्षं "Diploma in Sanskrit Teaching" इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ३ दिनाङ्के अभ्यासक्रमोऽयम् आरब्धः वर्तते । ३० छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते ।

सम्पन्नः शिवमहिम्नः स्तोत्रवर्गः ।

संस्कृतसाहित्ये स्थितं स्तोत्रसाहित्यं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-फाउण्डेशनसंस्थानं नियतं स्तोत्रपाठवर्गान् सञ्चालयति । एतस्मिन् एव उपक्रमे अगस्तमासस्य १० दिनाङ्कतः ३१ दिनाङ्कपर्यन्तं शिवमहिम्नः स्तोत्रवर्गस्य आयोजनम् अभवत् । अभ्यासक्रमेऽस्मिन् शिवमहिम्नः स्तोत्रस्य श्लोकानां शुद्धम् उच्चारणं भावानुवादं च डॉ. अमी जोशी अपाठयत् ।

कृपया हसन्तु

नमन: - (वित्तकोषाधिकारिणं प्रति) भो: महोदय ! पञ्चलक्षरूप्यकाणां ऋणम् आवश्यकम् !

अधिकारी - किं भवान् तदर्थं प्रार्थनां कृतवान् ? (प्रार्थनापत्रं दत्तवान् ?)

नमन: - न, न, अधुना करोमि !!

अधिकारी - तर्हि प्रथमं तत् करोतु ।

अधिकारिण: वचनं श्रुत्वा नमन: भूमौ साष्टाङ्गं नमस्कारं कृत्वा अवदत् - "भो: कृपया पञ्चलक्षरूप्यकाणि ऋणरूपेण ददातु" इति ।

★ ★ ★ ★ ★

वैद्य: - (रमणं प्रति) पूर्वं कदापि न्यूमोनिया-समस्या आसीत् किम् ?

रमण: - आम्, आसीत् ।

वैद्य: - कदा ?

रमण: - यदा अहम् अष्टम्यां कक्ष्यायाम् आसं तदा शिक्षिका न्यूमोनियापदस्य अक्षरविन्यासं (spelling) पृष्टवती तदानीं बहूसमस्या आसीत् ।

★ ★ ★ ★ ★

चित्रनिर्देशक: - (नायकं प्रति) इदानीं भवता भवनस्य दशमाट्टत: अध: पतनीयम् ।

अभिनेता - (सशङ्कम्) यदि मम शरीरे आघात: भवेत् तर्हि ?

चित्रनिर्देशक: - न कापि चिन्ता, यत: एतत् चलचित्रस्य अन्तिमं दृश्यमस्ति ।

सुभाषितम्

- संस्कृतविकिपीडियाजालस्थानात्

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।

तस्य धीशालिन: कोऽन्य: सहेताराालिता भ्रुवम् ॥

तात्पर्यम् – यस्य सेना अतीव महती, तस्या: पुरस्तात् कस्यापि सेना भवतु, सा न्यूना एव । तादृशस्य बुद्धिमत: पराक्रमं को वा सहेत ? स: बहु बलवान् भवति इत्यर्थ: ।

साहित्यसङ्गीतकलाविहीन: साक्षात्पशु: पुच्छविषाणहीन: ।

तृणं न खादन्नपि जीवमान: तद्भागधेयं परमं पशूनाम् ॥

तात्पर्यम् – गद्यात्मकं पद्यात्मकं च काव्यं विचारप्रधानं शास्त्रं साहित्यशब्देन विवक्षितम् । साहित्येन ज्ञानम् अभिवर्धते, सङ्गीतेन शिल्पेन (कलया) च आत्मसन्तोष: भवति । एकस्मिन् अपि विषये यस्य उत्साह: न भवति स: पशु: एव । पशो: पुच्छं शृङ्गे च भवन्ति, एतस्य मनुष्यस्य तु तानि न सन्ति इत्येव भेद: । अपरोऽपि भेद: यत् एष: तृणं न खादति पशव: तु खादन्ति । किन्तु एतत् पशूनां परमं भाग्यमेव । अन्यथा पशूनां तृणम् एव दुर्लभं स्यात् ।

ज्ञानसरित्

श्यामः पटेलः



अश्मीभूताः भीमसरटाः - मित्राणि ! प्रायः चतुर्विंशतिकोटिवर्षेभ्यः आरभ्य षट्कोटिवर्षेभ्यः पूर्वं यावत् भूमण्डले येषां प्रभुत्वम् आसीत् ते 'डायनासोर' इत्याख्याः भीमसरटाः मानवसृष्टेः प्राक् आसन् । अतः तेषां विषये वैज्ञानिकाः यावत् जानन्ति तत् सर्वं भीमसरटानाम् अस्थिपिञ्जराणाम् अध्ययनेन एव शक्यमभवत् । तदत्र ज्ञातुं यतामहे । भीमसरटानाम् अश्मीभूतेषु अस्थिपिञ्जरेषु एकः एव अस्थिपिञ्जरः सम्पूर्णः प्राप्तः अस्ति । सः २७ मीटरमितस्य अस्थिपिञ्जरः अमेरिकादेशस्य कोलोराडोतः सम्प्राप्तः आसीत् । अस्माकं गुजरातस्य महिसागरजनपदस्य बालासिनोरसमीपस्थे रायोलीग्रामेऽपि भीमसरटानाम् अण्डानि अस्थीनि च प्राप्तानि सन्ति । इदानीं यावत् ये ये अस्थिपिञ्जराः प्राप्ताः तेषु लघुतमः भीमसरटः १० सेन्टीमीटरमितस्य आसीत् । पादाभ्यां चलन्तः भीमसरटाः द्विप्रकारकाः आसन्–शाकाहारिणः मांसाहारिणश्च । टी–रेक्स इत्याख्यः भीमसरटः मांसाहारी आसीत् । अमेरिकायाः बेलेवियाराज्ये भीमसरटानां षट्कोटिवर्षीयानि ५००० पदचिह्नानि पर्वतस्योपरि अङ्कितानि सन्ति । ख्रीस्ताब्दस्य २०१५तमे वर्षे यः अस्थिपिञ्जरः सम्प्राप्तङ्कः अस्ति सः दशकोटिवर्षीयः अस्ति । वैज्ञानिकानां मतानुसारेण भीमसरटाः पक्षिजातीयाः परिगण्यन्ते । अतः पृथिवीतः तेषाम् अस्तित्वं न इतोऽपि नष्टं जातम् । यथा अद्यत्वे पक्षिणः पाषाणखण्डानि खादन्ति तथा भीमसरटाः अपि वनस्पतिना सह पाषाणमपि खादन्ति स्म । तानि पाषाणखण्डानि पाचनक्रियायाम् उपयोगीनि भवन्ति इति वैज्ञानिकानां मतम् ।

शब्दमञ्जूषा

भण्डनम्	कवच	armour
गुरणम्	प्रयत्न	effort
नैभृत्यम्	विनम्रता	modesty
दिरिपकः	गेंद	ball
कन्धिः	समुद्र	ocean
शर्मण्यम्	शरणदेनेवाला	sheltering
अभिद्रुग्धम्	आहत	injured
उद्भासुरः	प्रकाशमान	shining
उद्धूलनम्	चूरा करना	powdering
अगोचरम्	अप्रत्यक्ष	imperceptible
किलिञ्जम्	चटाई	mat
मणिकः	जलकलश	water jar
औज्ज्वल्यम्	उज्ज्वलता	brightness
कीकसम्	कठोर	hard
प्रतिवार्ता	समाचार	news

किं भवन्तः जानन्ति ?

१) एतेषु कः चित्रकारः नास्ति ?

(क) रविवर्मा (ख) हरिप्रसादः (ग) अवनीन्द्रः (घ) नन्दलालः

२) एतेषु कः हिन्दुस्तानीसङ्गीतस्य प्राचीनः गायकः अस्ति ?

(क) पुरन्दरदासः (ख) त्यागराजः (ग) तानसेनः (घ) श्यामशास्त्री

३) एतेषु कः कर्णाटकसङ्गीतस्य प्राचीनः गायकः नास्ति ?

(क) श्यामशास्त्री (ख) मत्थुस्वामी (ग) स्वामी हरिदासः (घ) त्यागराजः

४) एतेषु कः हिन्दुस्तानीसङ्गीतस्य प्राचीनः गायकः नास्ति ?

(क) बैजूबावरा (ख) तानसेनः (ग) हरिदासः (घ) पुरन्दरदासः

५) हिन्दुस्तानीसङ्गीतस्य आधुनिकः गायकः एतेषु कः वर्तते ?

(क) पुरन्दरदासः (ख) स्वामी हरिदासः (ग) विष्णुः दिगम्बरः (घ) त्यागराजः

६) हिन्दुस्तानीसङ्गीतस्य आधुनिकः गायकः एतेषु कः नास्ति ?

(क) विष्णुनारायणः (ख) भीमसेनः जोशी (ग) एम. एच. सुब्बालक्ष्मी (घ) पं. जसराजः

७) कर्णाटकसङ्गीतस्य आधुनिकः गायकः एतेषु कः वर्तते ?

(क) विनायकरावः (ख) रामानुजः आयङ्गरः (ग) कुमारगन्धर्वः (घ) विष्णुदिगम्बरः

उत्तराणि – (१) ख (२) ग (३) ग (४) घ (५) ग (६) ग (७) ख

अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

Eklavya Sankrit Foundation's America chapter and Canada chapter presents

Value Education Through Sanskrit

बालसंस्कृतवर्गः

Date : 12 Sep 2026 to 29 May 2027
Day : Friday
Time : 5pm to 6:30pm (PST)
7pm to 8:30pm (CST)
8pm to 9:30pm (EST)
Fees : **199 $**

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

स्तोत्रपाठः

(निश्चतस्तोत्राणि) **Online**

- सङ्कटनाशनगणेशस्तोत्रम्
- गणेश–अथर्वशीर्षस्तोत्रम्
- नवग्रहश्लोकाः

Date : 9/9/26 to 28/9/26
Day : Mon-Wed-Fri
Time : 7.00am to 8.30am
Fees : ₹ 999/-

Learn Online

संस्कृतभाषाशिक्षणम्

First Level

Date : 2/10/2026 to 30/12/2026
Day : Mon-Wed-Fri
Time : 7.00 am to 8.30 am (IST)
Fees : 7000/-

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

संस्कृत-
साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

प्रियवाचकाः

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006